CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13.
Coll. No. 369

Title Kālāgni rudropaniṣad

369

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 369 Subject: Vedic Rit.

Title: Kalagnirudropanisad

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9" by 5" Extent: 1 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

श्रीगणेशाय नमः॥ ॥अथ कालाग्निरुद्रोपनिषदः संवर्त्तकोग्निर्ऋषिः। अनुष्टु
प्छंदः। कालाग्निरुद्रो देवता। रुद्रप्रीत्यर्थे जपे विनियोगः॥ ॐ अथ कालाग्निरु
द्रं भगवंतं सनत्कुमारः पप्रछ। अधीहि भगवन् त्रिपुंड्रविधिं सतत्वं किं द्रव्यं
कियत्स्थानं कति प्रमाणं का रेखाः के मंत्राः का शक्तिः। किं दैवतं कः कर्त्ता किं फल
मिति। तं होवाच भगवान्कालाग्निरुद्रः। यद्द्रव्यं तदाग्नेयं भस्म। सद्योजातादिपं
चब्रह्ममंत्रैः परिगृह्य अग्निरिति भस्मेत्यनेन चाभिमंत्र्य मानस्तोक इति स
मुद्धृत्य जलेन संसृज्य त्र्यायुषमिति शिरोललाटवक्षःस्कंधेषु त्र्यायुषैस्त्र्यं
बकैस्तिर्यक् तिस्रो रेखाः प्रकुर्वीत व्रतमेतच्छांभवं सर्वेषु वेदेषु वेदवादिभि
रुक्तं भवति तस्मात्तत्समाचरेन्मुमुक्षुर्न पुनर्भवाय। अथ सनत्कुमारः प्रमा
णमस्य त्रिपुंड्रधारणस्य त्रिधा च रेखा आललाटादाचक्षुषमाभ्रुवोर्मध्य

तस्ययास्यप्रथमरेखासागार्हपत्यश्चाकारोरजोभूर्लोकःस्वात्माक्रियाशक्तिःऋग्वे
दःप्रातःसवनंमहेश्वरोदेवतेति।यास्याद्वितीयरेखासादक्षिणाग्निरुकारःस
त्वमंतरिक्षमंतरात्माचेछाशक्तिःयजुर्वेदोमाध्यंदिनंसवनंशिवोदेवतेति।
यास्यतृतीयारेखासाआहवनीयोमकारस्तमोद्यौर्लोकःपरमात्माज्ञानश
क्तिःसामवेदस्तृतीयसवनंशिवोदेवतेति।त्रिपुंड्रंभस्मनाकरोतियोविद्वा
न्ब्रह्मचारीगृहस्थोवानप्रस्थोतिर्येवासमहापातकोपपातकेभ्यःपूतो
भवति।ससर्वेषुतीर्थेषुस्नातोभवति।ससर्वान्देवान्ध्यायोभवति।ससर्वान्वेदा
नधीतोभवति।ससततंसर्वरुद्रमंत्रजापीभवति।सकलभोगान्भुंक्तेदेहं
त्यक्त्वाशिवसायुज्यमेति।नसपुनरावर्त्ततिनसपुनरावर्त्ततइत्याहभगवा
न्कालाग्निरुद्रोयस्त्वेतद्वाधीतेसोप्यमेवभविष्यतीत्योंसत्यमित्युपनिषत्॥ ॥

इतिकालाग्निरुद्रोपनिषत्समाप्तः॥ ॥